CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

अग्निप्रज्वाल्य।

श्रीगणेशाय नमः॥ अथ विवाहे सायंप्रातरौपासन होमविधिः॥ आचम्य पवित्रे धृत्वा
प्राणानायम्य देशकालौ संकीर्त्य अद्येत्यादि पूर्वोच्चरित एवंगुणविशेषणविशिष्टायां
पुण्यतिथौ मम उपात्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं सायमौपासन होमं तं
डुलैर्होष्यामि। अथ ध्यानं। चत्वारि० वरदो भव। परिसमूहनं त्रिः। परिस्तरणं त्रिः पर्यु
क्षणं। तूष्णीं अवज्वलनं प्रोक्षणं त्रिः पर्यग्निकृत्वा। तदुल्मुकं निरस्याग्नेः पश्चिमत
आस्तीर्णकुशेषु समिधा सह हविर्निधाय। अन्वाचनं। विश्वानि न इति तिसृणां मात्रे
यो वसुश्रुत ऋषिः अग्निस्त्रिष्टुप्। अग्न्यर्चने वि०। ॐ विश्वानि नो० यत्वा हृदा० यस्मै त्वं सुकृ
ते० इति सूक्ताभ्यामृग्भ्यां प्रतिपादमष्टदिक्षु गंधादिनाग्निमभ्यर्च्य तृतीयया बद्धांज
लिर्नमस्कृत्य दक्षिणं जान्वाच्य समिधं तूष्णीमग्नौ प्रक्षिप्य उपसंश्रय समिधि

५ प्रक्षालितानार्द्रसिततंडुलसमिधप्रभृति पात्रमग्नेरुत्तरतो निधाय ५

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

सायंहो० १ प्रदीप्तायां विधूमज्वालांगारेऽग्नौ शतसंख्याकान्नस्य चतुःषष्टितमभागमितान्वा तंडुला
न्दक्षिणहस्तेनादाय सव्यपाणिं हृदि निधायांगुल्युत्तरपार्श्वेन समिन्मूलतो द्व्यंगुलप्रदे
शे। ओं अग्नये स्वाहेति हुत्वा अग्नय इदं न ममेति त्यक्त्वा तस्या ऐशानदेशे मनसा प्र
जापतये स्वाहा। प्रजापतय इदं। परिस्तरणानि विसृज्य परिसमूहनपर्युक्षणे कृत्वो
पस्थानं कुर्यात्। तत्र क्रमः। अग्न आयूंषीति तिसृणां शतं वैखानसा ऋषयः। अग्निः
पवमानो देवता। गायत्री छंदः। अग्न्युपस्थाने वि०। ओं अग्न आयूंषि० ऋक् ३ अग्ने त्वं
न इति च तसृणां गौपायना लौपायना वा बंधुः सुबंधुः श्रुतबंधुर्विप्रबंधुश्चैकैकर्चा
ऋषयः। अग्निर्देवता। द्विपदा विराट् छंदः। अग्न्युपस्थाने वि० ओं अग्ने त्वं नो अंतमः० शिव १
ऋक् ४ प्रजापते हिरण्यगर्भः प्रजापतिस्त्रिष्टुप्। प्रजापत्युपस्थाने वि० ओं प्रजाप

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

तेनस्वत॰ ऋक् १ तंतुंतन्वन्नित्यस्य देवा अग्निर्जगती। अग्न्युपस्थाने वि॰ [illegible] तंतुंतन्व
न्॰ ऋक् १ हिरण्यगर्भोहिरण्यगर्भः प्रजापतिस्त्रिष्टुप्। प्रजापत्युपस्थाने वि॰ ॐ हि
रण्यगर्भः स॰ ऋक् १ एतैर्मंत्रैर्वायव्यदेशे प्रह्वः कृतांजलिरग्निमीक्षमाणउपस्था
यपुनरुपविश्य। मानस्तोकेतिकुत्सोरुद्रोजगती। विभूतिग्रहणेविनियोगः। मानस्तो
केति ऋक् १। त्र्यायुषंजमदग्नेरितिललाटे। कश्यपस्य त्र्यायुषमितिकंठे। अगस्त्य
स्य त्र्यायुषमितिनाभौ। यद्देवानांत्र्यायुषंदक्षिणांसे। तन्मेअस्तुत्र्यायुषंवामांसे।
शतायुषंशिरसि। ओंचमेस्व॰ तस्मैतेनमः। स्वस्तिश्रद्धांमेधांयशःप्रज्ञांविद्यांबु *अग्नयेनमः।
४ आयुष्यं* द्धिंश्रियंबलंतेजआरोग्यंदेहिमेहव्यवाहनो अथअग्निप्रदक्षिणा। अग्नेनय ४ नमः।
सुपथा॰ वर्ग१ यस्यस्मृत्याचनामोक्त्यातपोयज्ञक्रियादिषु। न्यूनंसंपूर्णतांयाति
सद्योवंदेतमच्युतं। प्रमादात्कु॰ श्रुतिः। अनेनयथाज्ञानेनयथाशक्त्यासायमौप
सनहोमाख्येनकर्मणाअग्निरूपीपरमेश्वरःप्रीयतां॥ ॥विष्णुस्मरणंकृत्वा॥ ॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

श्री ॥ अथ संक्षेपप्रातरौपासनहोमविधिः ॥ एवं प्रातरुदयात्पूर्वं प्रादुष्करणं कृत्वा होमकाले
२ पूर्ववत्पूर्वांगानि कृत्वा सूर्याय स्वाहेति सायं द्रव्येणैव प्रथमाहुतिं कृत्वा सायंकालद्विती
याहुतिवत् द्वितीयाहुतिं कृत्वा परिसमूहनादिकं कृत्वोपस्थानं कुर्यात् तत्र मंत्राः सूर्यो
नो दिवस्पात्विस्य सूर्यश्चक्षुः सूर्यो अतिच्छन्दः गायत्री सूर्योपस्थाने वि० ॥ ॐ सूर्यो नो दि
वस्पातु० उदुत्य काण्वः प्रस्कण्वः सूर्यो गायत्री विनियोगः प्राग्वत् ॥ ॐ उदुत्यं जातवेदसं० १
चित्रं देवानामांगिरसः कुत्सः सूर्यस्त्रिष्टुप् विनियोग उक्तः ॥ ॐ चित्रं देवानामुत् ० १ नमो मित्र
स्येति सौर्योभितपाः सूर्यो जगती विनियोग उक्तः ॥ ॐ नमो मित्रस्य० १ एतैश्चतुर्भिः सूर्यं प्र
जापतेन तत् हिरण्यगर्भ इति द्वाभ्यां प्रजापतिं चोपस्थायोंचमेदिति प्रातर्होमविशेषः ॥ यो
दद्यात्कांचनं मेरुं पृथिवीं च ससागरां ॥ सायं प्रातर्होमस्य तुल्यं भवति वा न वेति ॥ इति प्रातर्होमविधिः ॥
२

Kashi Maharani Collection, Ramnagar Fort, Varanasi